1

अथ पुरुषसूक्त प्रारंभः प नसम्

श्रीगणेशाय नमः॥ हरिः ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृ
त्वात्यतिष्ठद्दशांगुलं॥ पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यं॥ उतामृतत्वस्येशानो यदन्नेनातिरो
हति॥ एतावानस्य महिमातो ज्यायांश्च पूरुषः॥ पादोस्य विश्वा भूतानि त्रिपादस्यामृ
तं दिवि॥ त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः॥ ततो विश्वं व्यक्रामत्साशनानश
ने अभि॥ तस्माद्विराडजायत विराजो अधिपूरुषः॥ स जातो अत्यरिच्यत पश्चाद्भूमिमथो
पुरः॥ यत्पुरुषेण हविषा देवा यज्ञमतन्वत॥ वसंतो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्ध
विः॥ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः॥ तेन देवा अयजंत साध्या ऋषयश्च ये॥ त

2 स्मा यज्ञात्सर्वहुतः संभृतं पृषदाज्यं। पशूंस्तांश्चक्रे वायव्यानारण्यान्ग्राम्याश्च ये। तस्मा
द्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे। छंदांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत। तस्मादश्
वा अजायंत ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः॥२॥ यत्पुरुषं
व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते। ब्राह्मणोस्य मु
खमासीद्बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत। चंद्रमा मनसो
जातश्चक्षोः सूर्यो अजायत। मुखादिंद्रश्चाग्निश्च प्राणाद्वायुरजायत। नाभ्या आसीदंत
रिक्षं शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन्। सप्तास्या

पृथिव्याः सप्त धामभिः इदं
विष्णुर्विचक्रमे ३

न्तरिक्षमस्मिन् सप्त समिधः कृताः देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुं यज्ञेन य
ज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ते ह नाकं महिमानः सचन्त यत्र पूर्वे सा
ध्याः सन्ति देवाः ॥ ३ ॥ अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढ
मस्य पांसुरे ॥ त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः ॥ अतो धर्माणि धारयन् ॥ विष्णोः
कर्माणि पश्यत यतो व्रतानि पस्पशे ॥ इन्द्रस्य युज्यः सखा ॥ तद्विष्णोः परमं पदं सदा
पश्यन्ति सूरयः ॥ दिवीव चक्षुराततं ॥ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते ॥
विष्णोर्यत्परमं पदं ॥ [illegible] विष्णवे नः पातु ॥

संवाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयंदेवएकः॥संसृष्टंधनमुभयंसमाकृतमस्मभ्यं
दत्तांवरुणश्चमन्युः॥भियंदधानाहृदयेषुशत्रवःपराजितासौअपनिलयंतां॥बलायश
श्रियैयशसेन्नाद्यायभूर्भुवस्वः अमुनाभिषेकोस्तु॥८॥ ॥श्री॥

५

॥इति पञ्चसूक्तसमाप्तं॥